Amritanilayam Stotras

?????????????

“गायन्तं त्रायते इति गायत्री ”

ॐ भूर्भुव॒स्सुवः॑ ॥
तथ्स॑वि॒तुर्वरे᳚ण्यं॒ भर्गो॑ दे॒वस्य॑ धीमहि ।
धियो॒ यो नः॑ प्रचोदया᳚त् ॥

1। शरीर शुद्धि

श्लो॥ अपवित्रः पवित्रो वा सर्वावस्थां᳚
गतोऽपिवा ।
यः स्मरेत् पुण्डरीकाक्षं स
बाह्याभ्यन्तरश्शुचिः ॥

2। आचमनम्
ॐ आचम्य । ॐ केशवाय स्वाहा । ॐ नारायणाय स्वाहा । ॐ
माधवाय स्वाहा । ॐ गोविन्दाय नमः । ॐ -विँष्णवे नमः
। ॐ मधुसूदनाय नमः । ॐ त्रिविक्रमाय नमः । ॐ -
वाँमनाय नमः । ॐ श्रीधराय नमः । ॐ हृषीकेशाय नमः । ॐ
पद्मनाभाय नमः । ॐ दामोदराय नमः । ॐ सङ्कर् षणाय नमः
। ॐ -वाँसुदेवाय नमः । ॐ प्रद्युम्नाय नमः । ॐ
अनिरुद्धाय नमः । ॐ पुरुषोत्तमाय नमः । ॐ
अधोक्षजाय नमः । ॐ नारसिंहाय नमः । ॐ अच्युताय नमः
। ॐ जनार्धनाय नमः । ॐ उपेन्द्राय नमः । ॐ हरये नमः ।
ॐ श्रीकृष्णाय नमः । ॐ श्रीकृष्ण परब्रह्मणे नमो
नमः ।

3। भूतोच्चाटन
उत्तिष्ठन्तु । भूत पिशाचाः । ये ते भूमिभारकाः ।
ये तेषामविरोधेन । ब्रह्मकर्म समारभे । ॐ
भूर्भुवस्सुवः ।

4। प्राणायामम्
ॐ भूः । ॐ भुवः । ओग्ं सुवः । ॐ महः । ॐ जनः । ॐ तपः ।
ओग्ं स॒त्यम् ।
ॐ तथ्स॑वि॒तुर्वरे᳚ण्यं॒ भर्गो॑ दे॒वस्य॑ धीमहि
।

धियो॒ यो नः॑ प्रचोदया᳚त् ॥
ओमापो॒ ज्योती॒ रसो॒ऽमृतं॒ ब्रह्म॒ भू -र्भुव॒ -
स्सुव॒रोम् ॥ (तै. अर. 10-27)

5। सङ्कल्पम्
ममोपात्त , दुरितक्षयद्वारा , श्री परमेश्वर
प्रीत्यर्थं , शुभे, शोभनेमुहूर्ते ,
महाविष्णोराज्ञया , प्रवर्तमानस्य अद्यब्रह्मणः
द्वितीयपरार्थे , श्वेतवराहकल्पे ,
वैवश्वतमन्वन्तरे , कलियुगे , प्रथमपादे ,
जम्भूद्वीपे , भरतवर् षे, भरतखण्डे , अस्मिन्
वर्तमान व्यावहारिक चान्द्रमानेन ——- सं वँत्सरे
— — अयने ——- ऋतौ ——- मासे ——- पक्षे ——- तिधौ —— वासरे
— — – शुभनक्षत्रे (भारत देशः – जम्बू द्वीपे , भरत वर्
षे, भरत खण्डे , मेरोः दक्षिण /उत्तर दिग्भागे ;
अमेरिका – क्रौञ्च द्वीपे , रमणक वर् षे, ऐन्द्रिक
खण्डे , सप्त समुद्रान्तरे , कपिलारण्ये) शुभयोगे
शुभकरण एवङ्गुण विशेषण विशिष्ठायां शुभतिथौ
श्रीमान् ——– गोत्रस्य ——- नामधेयस्य (
विवाहितानाम् – धर्मपत्नी समेतस्य) श्रीमतः
गोत्रस्य ममोपात्तदुरितक्षयद्वारा
श्रीपरमेस्वर प्रीत्यर्धं मम सकल श्रौतस्मार्त
नित्यकर्मानुष्ठान योग्यताफलसिध्यर्धं नूतन
यज्ञोपवीतधारणं करिष्ये ।

6। यज्ञोपवीत धारण

यज्ञोपवीत प्राण प्रतिष्ठापनं करिष्ये।

श्लो॥ ॐ असुनीते पुनरस्मासु चक्षुः पुनःप्राणमिह
नो धेहि भोगम् ।
ज्योक्पश्येम सूर्यमुच्चरं तमनुमते मृडया नः
स्स्वस्ति ॥ ऋ.वे. – 10.59.6
अमृतं -वैँ प्राणा अमृतमापः प्राणानेव
यथास्थानमुपह्वयते ।

7। यज्ञोपवीत मन्त्रम्

श्लो॥ यज्ञोपवीते तस्य मन्त्रस्य परमेष्टि
परब्रह्मर् षिः ।
परमात्म देवता , देवी गायत्रीच्छन्दः ।
यज्ञोपवीत धारणे विनियोगः ॥

8। यज्ञोपवीत धारण मन्त्रम्

श्लो॥ यज्ञोपवीतं परमं पवित्रं
प्रजापतेर्यत्सहजं पुरस्तात् ।
आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं -
यँज्ञोपवीतं बलमस्तु तेजः ॥

9। जीर्ण यज्ञोपवीत विसर्जन

श्लो॥ उपवीतं छिन्नतन्तुं जीर्णं कश्मलदूषितं
विसृजामि यशो ब्रह्मवर्चो दीर्घायुरस्तु मे ॥
ॐ शान्ति शान्ति शान्तिः

चतुस्सागर पर्यन्तं गो ब्राह्मणेभ्यः शुभं भवतु ।
— — — - प्रवरान्वित ——— गोत्रोत्पन्न ——— शर्म ———
अहं भो अभिवादये ।

समर्पण

यस्य स्मृत्या च नामोक्त्या तपस्सन्ध्या
क्रियादिषु
न्यूनं सम्पूर्णतां -याँति सद्यो वन्दे तमच्युतम्
।
मन्त्रहीनं क्रियाहीनं भक्तिहीनं रमापते
यत्कृतं तु मया देव परिपूर्णं तदस्तु मे ॥

अनेन यज्ञोपवीत धारणेन , श्री लक्ष्मीनारायण
प्रेरणाय , श्री लक्ष्मीनारायण प्रीयन्तां -वँरदो
भवतु ।
श्री कृष्णार्पणमस्तु ॥

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्या உत्मना वा
प्रकृते स्स्वभावात् ।
करोमि यद्यत्सकलं परस्मै श्रीमन्नारायणायेति
समर्पयामि ॥

Sri Amritananda Natha Guruvu Garu, Amrita Nilayam, Gowravaram Village & Post, Kavali Mandal, Nellore District, Andhra Pradesh. Phone Number: +91 9493475515 | www.amritanilayam.org